# sudarshanakavacham 4

# સુદર્શનકવચમ્ ૪

## Document Information

Text title : sudarshanakavacham 4

File name : sudarshanakavacham4.itx

Category : vishhnu, krishna, puShTimArgIya

Location : doc_vishhnu

Proofread by : PSA Easwaran psawaswaran at gmail.com

Description/comments : puShTimArgIya stotraratnAkara

Latest update : February 28, 2018

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 30, 2019

*sanskritdocuments.org*

# સુદર્શનકવચમ્ ૪

શ્રીકૃષ્ણાય નમઃ ॥ શ્રીગોપીજનવલ્લભાય નમઃ ॥

અથ વિનિયોગઃ
ૐ અસ્ય શ્રીસુદર્શનકવચમહામન્ત્રસ્ય નારાયણૠષિઃ ।
શ્રીસુદર્શનો દેવતા ॥ ગાયત્રી છન્દઃ ॥ દુષ્ટં દારયતીતિ કીલકમ્ ॥

હન હન દ્વિષ ઇતિ બીજમ્ ॥

સર્વશત્રુક્ષયાર્થે સુદર્શનસ્તોત્રપાઠે વિનિયોગઃ ॥

અથ ન્યાસઃ
ૐ નારાયણૠષયે નમઃ શિરસિ ॥

ૐ ગાયત્રી છન્દસે નમઃ મુખે ॥

ૐ દુષ્ટં દારયતીતિ કીલકાય નમઃ હૃદયે ॥

ૐ હ્રાં હ્રીં હ્રૂં દ્વિષ ઇતિ બીજાય નમઃ ગુહ્યે ॥

ૐ સુદર્શને જ્વલત્પાવકસઙ્કાશેતિ કીલકાય નમઃ સર્વાઙ્ગે ॥

ઇતિ ઋષ્યાદિઃ ॥

અથ હૃદયાદિન્યાસઃ
ૐ નારાયણૠષયે નમઃ અઙ્ગુષ્ઠાભ્યાં નમઃ ॥

ૐ ગાયત્રીછન્દસે નમઃ તર્જનીભ્યાં નમઃ ।
ૐ દુષ્ટં દારયતીતિ કીલકાય નમઃ મધ્યમાભ્યાં નમઃ ॥ -
ૐ હ્રાં હ્રીં હ્રૂં દ્વિષ ઇતિ બીજાય નમઃ અનામિકાભ્યાં નમઃ ॥

ૐ સર્વશત્રુક્ષયાર્થે શ્રીસુદર્શનદેવતેતિ
કરતલ-કરપૃષ્ઠાભ્યાં નમઃ ॥

ૐ નારાયણૠષયે નમઃ હૃદયાય નમઃ ॥

ॐ ગાયત્રીછન્દસે નમઃ શિરસે સ્વાહા ॥

ॐ દુષ્ટં દારયતીતિ કીલકાય નમઃ શિખાયૈ વષટ્ ॥

ॐ હ્રાં હ્રીં હ્રૂં દ્વિષ ઇતિ બીજાય નમઃ કવચાય હુમ્ ॥

ॐ સુદર્શન જ્વલત્પાવકસઙ્કાશેતિ નેત્રત્રયાય વૌષટ્ ॥

ॐ સર્વશત્રુક્ષયાર્થે સુદર્શનદેવતેતિ અસ્ત્રાય ફટ્ ॥

ઇતિ ન્યાસં વિધાય ધ્યાનં કુર્યાત્ ।
અથ ધ્યાનમ્ ।
સુદર્શનં મહાવેગં ગોવિન્દસ્ય પ્રિયાયુધમ્ ।
જ્વલત્પાવકસઙ્કાશં સર્વશત્રુવિનાશનમ્ ॥ ૧॥

કૃષ્ણપ્રાપ્તિકરં શશ્વદ્ભક્તાનાં ભયભઞ્જનમ્ ।
સઙ્ગ્રામે જયદં તસ્માદ્ધ્યાયેદેવં સુદર્શનમ્ ॥ ૨॥

અથ મન્ત્રઃ -
ॐ હ્રાં હ્રીં હ્રૂં નમો ભગવતે ભો ભો સુદર્શનચક્ર
દુષ્ટં દારય દારય
દુરિતં હન હન પાપં મથ મથ આરોગ્યં કુરુ કુરુ હું ફટ્ સ્વાહા ॥

અથ સુદર્શન-કવચમ્ ।
શ્રી કૃષ્ણાય નમઃ ॥ શ્રીગોપીજનવલ્લભાય નમઃ ॥

ॐ વૈષ્ણવાનાં હિ રક્ષાર્થં શ્રીવલ્લભનિરૂપિતઃ ।
સુદર્શનમહામન્ત્રો વૈષ્ણવાનાં હિતાવહઃ ॥ ૧॥

યન્ત્રમધ્યે નિરૂપ્યન્તે ચક્રાકારં ચ લિખ્યતે ।
ઉત્તરાગર્ભરક્ષા ચ પરીક્ષિતહિતે રતઃ ॥ ૨॥

બ્રહ્માસ્ત્રવારણં ચૈવ ભક્તાનાં ભયભઞ્જનઃ ।
વધં ચ દુષ્ટદૈત્યાનાં ખણ્ડં ખણ્ડં ચ કારકઃ ॥ ૩॥

વૈષ્ણવાનાં હિતાર્થાય ચક્રં ધારયતે હરિઃ ।
પીતામ્બરઃ પરબ્રહ્મ વનમાલી ગદાધરઃ ॥ ૪॥

કોટિકન્દર્પલાવણ્યો ગોપિકાપ્રાણવલ્લભઃ ।
શ્રીવલ્લભઃ કૃપાનાથો ગિરિધૃક્ શત્રુમર્દનઃ ॥ ૫॥

દાવાગ્નિપાનકર્તા ચ ગોપીભયનિવારકઃ ।
ગાપાલો ગોપકન્યાભિઃ સમાવૃત્તોઽધિતિષ્ઠતે ॥ ૬॥

વ્રજમણ્ડલપ્રકાશી ચ રામકૃષ્ણજગન્મયઃ ।
ગો-ગોપિકાસમાકીર્ણો વેણુવાદનતત્પરઃ ॥ ૭॥

કામરૂપી કલાવાંશ્ચ કામિન્યાં કામદો વિભુઃ ।
મન્મથો મથુરાનાથો માધવો મકરધ્વજઃ ॥ ૮॥

શ્રીધરઃ શ્રીકરશ્ચૈવ શ્રીનિવાસઃ સતાં ગતિઃ ।
ભુક્તિદો મુક્તિદો વિષ્ણુર્ભૂધરો ભૂતભાવનઃ ॥ ૯॥

સર્વદુઃખહરો વીરો દુષ્ટદૈત્યવિનાશકઃ ।
શ્રીનૃસિંહો મહાવિષ્ણુઃ શ્રીનિવાસઃ સતાં ગતિઃ ॥ ૧૦॥

ચિદાનન્દમયો નિત્યઃ પૂર્ણબ્રહ્મસનાતનઃ ।
કોટિભાનુપ્રાકાશી ચ નિશ્ચિતાર્થસ્વરૂપકઃ ॥ ૧૧॥

ભક્તપ્રિયઃ પદ્મનેત્રો ભક્તાનાં વાઞ્છિતપ્રદઃ ।
હૃદિ કૃષ્ણો મુખે કૃષ્ણો નેત્રે કૃષ્ણશ્ચ કર્ણયોઃ ॥ ૧૨॥

ભક્તિપ્રિયશ્ચ શ્રીકૃષ્ણઃ સર્વં કૃષ્ણમયં જગત્ ।
કાલમૃત્યુયમાહૂતં ભૂતપ્રેતો ન દૃશ્યતે ॥ ૧૩॥

પિશાચા રાક્ષસાશ્ચૈવ હૃદિ રોગાશ્ચ દારુણાઃ ।
ભૂચરાઃ ખેચરાઃ સર્વે ડાકિની શાકિની તથા ॥ ૧૪॥

નાટકં ચેટકં ચૈવ છલં છિદ્રં ન દૃશ્યતે ।
અકાલે મરણં તસ્ય શોકદુઃખં ન લભ્યતે ॥ ૧૫॥

સર્વવિઘ્નં ક્ષયં યાતિ રક્ષ મે ગોપિકાપ્રિય ।
ભયદાવાગ્નિચૌરાણાં વિગ્રહે રાજસઙ્કટે ॥ ૧૬॥

વ્યાલ-વ્યાઘ્ર-મહાશત્રુ-વૈરિબન્ધો ન લભ્યતે ।
આધિવ્યાધિહરશ્ચૈવ ગ્રહપીડા-વિનાશનમ્ ॥ ૧૭॥

ઇમે સપ્તશ્લોકા યન્ત્રમધ્યે ચ લિખ્યતે ।
વંશવૃદ્ધિર્ભવેત્તસ્ય શ્રોતા ચ ફલમાપ્નુયાત્ ॥ ૧૮॥

કૃષ્ણાષ્ટમીં સમારભ્ય યાવતકૃષ્ણાષ્ટમી ભવેત્ ।
દેવં ધ્યાત્વા જપેન્મત્રમયુતાનાં ચતુષ્ટયમ્ ॥ ૧૯॥

વૈષ્ણવાનાં હિ રક્ષાર્થં વૈષ્ણવાનાં હિતાય ચ ।
સુદર્શનમહામન્ત્રો લભતે જયમઙ્ગલમ્ ।
સર્વપાપહર કૃષ્ણ ત્વામહં શરણં ગતઃ ॥ ૨૦॥

ઇતિ શ્રીમદ્વલ્લભાચાર્યચરણવિરચિતં શ્રીસુદર્શનકવચં સમ્પૂર્ણમ્ ।

Proofread by PSA Easwaran psaeaswaran at gmail.com

*sudarshanakavacham 4*

pdf was typeset on November 30, 2019

Please send corrections to *sanskrit@cheerful.com*